स्थूलकणा ६ पृथुः ७ मनोज्ञा ८ कारवी ९ जीर्णा १० तरुणः ११ सुषवी १२ कारवी १३ पृथ्वीका १४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातगुल्मामदोषश्लेष्माध्मानजन्तुनाशित्वम्। जीर्णत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ *॥ त्रिविधजीरकनामगुणाः।
"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः कृष्णाजीरः सुगन्धश्च तथैवोद्गारशोधनः॥
कणाजाजी तु सुषवी कालिका चोपकालिका। पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका। उपकुञ्चो च कुञ्चो च बृहज्जीरक इत्यपि॥
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु। संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्॥
ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम्। चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्॥"
इति भावप्रकाशः॥

स्थूलतालः, पुं, (स्थूलस्तालः।) हिन्तालः। इति राजनिर्घण्टः॥

स्थूलत्वचा,स्त्री,(स्थूला त्वक् यस्याः।)काश्मरी। इति राजनिर्घण्टः॥

स्थूलदण्डः, पुं, स्थूलो दण्डो यस्य।) देवनलः। इति राजनिर्घण्टः॥

स्थूलदर्भः, पुं, (स्थूलो दर्भो यस्य। मुञ्जः। इति राजनिर्घण्टः॥

स्थूलदला, स्त्री, (स्थूलं दलं यस्याः।) गृहकन्या। इति राजनिर्घण्टः॥

स्थूलनालः, पुं, (स्थूलो नालः देवनलः। इति राजनिर्घण्टः॥

स्थूलनासः,पुं, (स्थूला नासा यस्य।) शूकरः। इति हेमचन्द्रः॥

स्थूलनासिकः,पुं,(स्थूला नासिका यस्य। "अञ्नासिकायाः संज्ञायां नसं चास्थूलात्।" ५।४। ११८। इत्यत्र स्थूलवर्ज्जनात् न नसादेशः।) शूकरः। इति त्रिकाण्डशेषः॥ पीननासायुक्ते, त्रि॥

स्थूलपटः, त्रि, (स्थूलः पटो यस्य। पीवरवस्त्रयुक्तः। यथा,—
"कृशलट्टाः स्थूलपटा यवगोधूमशालिनः। प्रलयेऽपि न सीदन्ति यदि कन्या न विद्यते॥"
इति पुराणम्॥
(स्थूलवस्त्रे, पुं क्ली॥)

स्थूलपट्टः,पुं,स्थूलः पट्टः कौषेय इव।)कार्पासः। इति शब्दरत्नावली॥

स्थूलपट्टाकः, (पुं, स्थूलपट्टं कार्पासं अकति प्राप्नोति कारणत्वेनेति। अक गतौ+अण्।) स्थूलवस्त्रम्। इति शब्दरत्नावली॥

स्थूलपादः, पुं,(स्थूलः पादो यस्य।)हस्ती। इति शब्दमाला॥ श्लीपदी च॥

स्थूलपुष्पः,पुं,(स्थूलं पुष्पमस्य।) वकवृक्षः। इति रत्नमाला॥ झण्टुक्षुपः। इति राजनिर्घण्टः॥

स्थूलपुष्पा, स्त्री, (स्थूलं पुष्पं यस्याः।) पर्व्वतजातापराजिता। इति रत्नमाला॥

स्थूलपुष्पी, स्त्री, (स्थूलं पुष्पं यस्याः। ङीष्।) यवतिक्ता। इति राजनिर्घण्टः॥

स्थूलफलः,(स्थूलं फलं यस्य।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥

स्थूलफला, स्त्री, (स्थूलं फलं यस्याः।) शणपुष्पी। इति राजनिर्घण्टः॥

स्थूलभद्रः,पुं,(स्थूलं प्रचुरमित्यर्थः भद्रं शुभं यस्य।) श्रुतकेवलिनामजैनभेदः। इति हेमचन्द्रः॥

स्थूलभूतं,क्ली, (स्थूलं भूतम्।) पञ्चीकृताकाशादिभूतम्। इति वेदान्तसारः॥

स्थूलमरिचं,क्ली, (स्थूलं मरिचम्।) कक्कोलम्। इति राजनिर्घण्टः॥

स्थूलमूलं,क्ली,(स्थूलं मूलमस्य।)चाणक्यमूलम्। इति राजनिर्घण्टः॥

स्थूललक्षः, त्रि, (स्थूलं प्रचुरं लक्षयति दानार्थमिति। लक्ष+अण्।) बहुप्रदः। इत्यमरटीकायां रायमुकुटः। ३।१।६॥ (यथा, याज्ञवल्क्यः। १। ३०८।
"महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः॥")

स्थूललक्ष्यः, त्रि, (स्थूलं प्रचुरं वस्तु लक्ष्यमस्य।) बहुप्रदः। इत्यमरः। ३।१।६॥ (यथा, महाभारते। ३। ४५। ११।
"अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः। सुहृदश्चान्नपानेन विविधेनाभिवर्षति॥")

स्थूलवर्त्मकृत्,पुं,(स्थूलस्य वर्त्मनः कृत् कारकः।) ब्राह्मणयष्टिका। इति शब्दचन्द्रिका॥

स्थूलवल्कलः, पुं, (स्थूलं वल्कलं यस्य।) रक्तलोध्रः। इति जटाधरः॥

स्थूलवृत्तफलः,पुं,(स्थूलं वृत्तफलं यस्य।) स्निग्धपिण्डीतकः। इति राजनिर्घण्टः॥

स्थूलवैदेही, स्त्री, (स्थूला वैदेही विदेहभवा च।) गजपिप्पली। इति राजनिर्घण्टः॥

स्थूलशरः, पुं, (स्थूलः शरः।) शरविशेषः। मोटा शर इति भाषा। तत्पर्य्यायः। महाशरः २ स्थूलशायकः ३ इक्षुरकः ४ क्षुरपत्रः ५ बहुमूलः ६ दीर्घमूलकः ७। अस्य गुणाः। मधुरत्वम्। सुतिक्तत्वम्। कोष्णत्वम्। कफभ्रान्तिमदापहरत्वम्। बलवीर्य्यकारित्वम्। नित्यं सेवितश्चेत् किञ्चिद्वातकरत्वञ्च। इति राजनिर्घण्टः॥

स्थूलशाटकः,पुं,(स्थूलः शाटकः।) पीनवस्त्रम्। मोटा कापड़ इति भाषा। तत्पर्य्यायः। वराशिः २। इत्यमरः। २। ६। ११६॥ वरासिः ३। इति जटाधरः॥

स्थूलशाटका,स्त्री, स्थूलवस्त्रम्। इत्यमरटीका। २। ६। ११६॥

स्थूलशाटिका, स्त्री,(स्थूला शाटिका।) स्थूलवस्त्रम्। इत्यमरटीका। २। ६। ११६॥

स्थूलशाटिः,पुं, (स्थूलः शाटिः।) वराशिः। इति हेमचन्द्रः॥

स्थूलशालिः, पुं, (स्थूलः शालिः।) शालिधान्यभेदः। तत्पर्य्यायः। महाशालिः २ स्थूलाङ्गः ३ स्थूलतण्डुलः ४। अस्य गुणाः। स्वादुत्वम्। मधुरत्वम्। शिशिरत्वम्। पित्तशमनत्वम्। जीर्णज्वर-दाह-जठररुजा-शोष-शमनत्वम्। शिशूनां यूनां जरतां च हितकरत्वम्। सदा सेवनेनातिबलवीर्य्यकारित्वञ्च। इति राजनिर्घण्टः॥

स्थूलशिरः, [स्] क्ली, (स्थूलं शिरः।) बृहन्मस्तकम्। (स्थूलं शिरो यस्य। मुनिविशेषः॥ यथा, महाभारते। २। ४। ११।
"वको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः॥")
स्थूलमस्तकयुक्ते, त्रि। इति केचित्॥

स्थूलशीर्षिका, स्त्री, शरीरापेक्षया स्थूलं शीर्षमस्याः स्थूलशीर्षा स्वार्थे के स्थूलशीर्षिका॥ क्षुद्रपिपीलिका। इति हेमचन्द्रः॥ बृहन्मस्तके, त्रि॥

स्थूलषट्पदः, पुं, (स्थूलः षट्पदः।) वरेलः। इति भूरिप्रयोगः॥ वोलता इति भाषा॥

स्थूलस्कन्धः,पुं,(स्थूलः स्कन्धो यस्य।) लकुचः। इति राजनिर्घण्टः॥

स्थूलहस्तः, पुं, (स्थूलो हस्तः।) हस्तिशुण्डम्। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। १४।
"स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥"
स्थूलौ हस्तौ यस्येति।) पीनभुजे, त्रि॥

स्थूला,स्त्री, (स्थूल+टाप्।) गजपिप्पली। इति शब्दचन्द्रिका॥ एर्व्वारुः। इति राजनिर्घण्टः॥ बृहदेला। इति रत्नमाला॥

स्थूलांशा, स्त्री,(स्थूलोंऽशो यस्याः।)गन्धपत्रा। इति राजनिर्घण्टः॥

स्थूलाम्रः, पुं,(स्थूलः आम्रः।) महाराजचूतः। इति राजनिर्घण्टः॥

स्थूलास्यः, पुं,(स्थूलं आस्यं यस्य।) सर्पः। इति शब्दचन्द्रिका॥ बृहन्मुखे, त्रि॥

स्थूली, [न्] पुं, (स्थूलं शरीरमस्यास्तीति। इनिः।) उष्ट्रः। इति केचित्॥

स्थूलैरण्डः,पुं,(स्थूल एरण्डः।)बृहदेरण्डवृक्षः। तत्पर्य्यायः। महैरण्डः २ महापञ्चाङ्गुलः ३। अस्य गुणाः।
"स्थूलैरण्डो गुणाढ्यः स्याद्रसवीर्य्यविपक्तिषु॥"
इति राजनिर्घण्टः॥

स्थूलैला, स्त्री, (स्थूला एला।) एलाविशेषः। बड़ एलाचि इति भाषा। तत्पर्य्यायः। बृहदेला २ त्रिपुटा ३ त्रिदिवोद्भवा ४ सुरभीत्वक् ५ महैला ६ पृथ्वी ७ कन्या ८ कुमारिका ९ कायस्था १० गोपुटा ११ भद्रैला १२ कान्ता १३ घृताचीगर्भसम्भवा १४ इन्द्राणी १५ दिव्यगन्धा १६ ऐन्द्री १७। एलाद्वयगुणाः। शीतलत्वम्। तिक्तत्वम्। उष्णत्वम्। सुगन्धित्वम्।